# Shri Siddhalingeshvara Stotram

# श्रीसिद्धलिङ्गेश्वरस्तोत्रम्

## Document Information

Text title : Shri Siddhalingeshvara Stotram

File name : siddhalingeshvarastotram.itx

Category : shiva, stotra, aShTottarashatanAma

Location : doc_shiva

Author : mAgaDi shrIvIrappashAstri

Proofread by : Vani V.

Latest update : October 31, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# श्रीसिद्धलिङ्गेश्वरस्तोत्रम्

अष्टोत्तरशतम्
(मागडि श्री वीरप्पशास्त्रिविरचितम्)

नमस्ते मङ्गलाङ्गाय धृतगङ्गाय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १॥

नमस्ते भक्तिवश्याय युक्तगम्याय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २॥

नमस्ते जितकालाय यतितुङ्गाय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३॥

नमस्ते मदनाराते सदयस्वान्त ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४॥

नमस्ते सुचरित्राय पापतूलाग्नये नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५॥

नमस्ते योगिवर्याय रागदूराय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६॥

नमस्ते विश्वपालाय शाश्वताय नमो नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७॥

नमस्ते दुष्टशिक्षाय शिष्टरक्षाय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८॥

नमस्ते गुरुरूपाय चररूपाय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९॥

नमस्ते भस्मदिग्धाङ्ग धृतरुद्राक्ष ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १०॥

नमस्ते ज्योतिरूपाय धूतपाशाय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ११॥

नमस्ते स्तवमोदाय भवनाशाय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १२॥

नमस्ते त्रिजगत्सूत्रधारकानादये नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १३॥

नमस्ते सच्चिदानन्दरूप निर्व्यय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १४॥

नमस्ते सुघृणाम्भोधे भुवनाजेय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १५॥

नमस्ते वीतशोकाय षड्स्थलब्रह्मणे नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १६॥

नमस्ते चिदकूपार तत्त्वकोविद ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १७॥

नमस्ते मुक्तिकोशाय पुण्यसद्माय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १८॥

नमस्ते योगिहृत्कञ्ज सूर्यरूपाय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १९॥

नमस्ते गुणभूषाय सत्यभाषाय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २०॥

नमस्ते नित्यतृप्ताय भृत्यपालक ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २१॥

नमश्चिच्छक्तियुक्ताय मुक्तिदायक ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २२॥

नमो मोहाद्रिशम्बाय माहात्म्यनिधये नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २३॥

नमो मायागुणाम्भोज नागायशिव ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २४॥

नमस्तेऽष्टमदेभेन्द्र हरये समुदे नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २५॥

नमस्ते षड्विषत्तूलानल शङ्कर ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २६॥

नमश्यान्त्यब्धि सोमाय दुःखाहि तार्क्ष्य ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २७॥

नमस्ते दुष्टनाशाय शिष्टतोषक ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २८॥

नमस्सुगुण रत्नौघ करण्डायार्य ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ २९॥

नमश्यीतांशुभूषाय लीलाविग्रह ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३०॥

नमस्ते शैवतन्त्रज्ञ कष्टाभ्राशुग ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३१॥

नमस्तेस्तु, निवृत्यध्वचारिणे गुरवे नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३२॥

नमः प्रवृत्तिनाशाय सद्वृत्यादर्श ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३३॥

नमो लिङ्गाङ्गसंयोगविदुषेयतये नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३४॥

नमस्ते श्री षड्वलङ्ग सार्वभौमाद्य ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३५॥

नमःपूजक सत्कल्पभूजाय सुहृदे नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३६॥

नमस्ते विश्वगुरुवे प्रमथावृत ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३७॥

नमस्ते शिष्यहृत्पापविच्छेद महते नमः ।

नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३८॥

नमश्शियखाचक्रमध्यभासते ख्यात ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ३९॥

नमस्तेस्तु शरण्याय बुधगण्याय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४०॥

नमस्ते ब्रह्मवित्पूज्य चित्क्रियाराज ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४१॥

नमस्ते जन्मनाशाय मृत्युदूराय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४२॥

नमस्ते विश्वरूपाय धूततापाय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४३॥

नमः श्रुत्यन्त तत्त्वार्थबोधकायाढ्य ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४४॥

नमस्ते निष्कळङ्काय निर्विकल्पाय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४५॥

नमशुद्ध सम्यज्ञाय समताभाव ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४६॥

नमश्शियवस्वरूपाय भवरुग्भिषजे नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४७॥

नमस्ते विधिनिषेधरहितामेय ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४८॥

नमस्ते मोक्षलक्ष्मीश शिक्षिताहित ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ४९॥

नमस्ते जघ्द्भागधेयदाय सुक्षण ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५०॥

नमो भक्तमनोभीष्टददते सुधये नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५१॥

नमःपूतचरित्राय सर्वज्ञाय नमो नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५२॥

नमस्ते नागभूषाय भूषितोडुप ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५३॥

नमस्ते धृतकाषाय वस्त्रायानन्त ते नमः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५४॥

पाहिमां परदारघ्नमन्यवित्तापहारिणम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५५॥

पाहिमामनृतोत्सुक्यं कोपविह्वलमानसम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५६॥

पाहिमां दुर्मदोन्मत्तं लोभावेशविजृम्भितम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५७॥

पाहिमां कामसन्तप्तं मात्सर्यगुणलोलुपम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५८॥

पाहिमां विषयासक्तं साधुसन्दोहदुःखदम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ५९॥

पाहिमां खलसंसर्गं दुर्भाषणकरोत्तमम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६०॥

पाहिमामुपकारघ्नं पिशुनत्वविहारिणम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६१॥

पाहिमामन्यसुगुरुणान् तृणीकृत्य जयोद्वहम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६२॥

पाहिमां सत्यविमुखं नीचश्चासत्यवादिनम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६३॥

पाहिमां दुर्भवाम्भोधि लुठन्तं गुप्तपातकम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६४॥

पाहिमां शान्तिरहितं रन्ध्रान्वेषणतत्परम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६५॥

पाहिमां त्यक्तसद्धर्मं शिवरामविभञ्जनम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६६॥

पाहिमां कृतविद्वेषमुक्तसद्गुरुदूषणम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६७॥

पाहिमामकृत श्रेष्ठलिङ्ग सद्गुरुपूजनम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६८॥

पाहिमां सर्वसम्पूज्य भस्मरुद्राक्षदूषणम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ६९॥

पाहिमां मदभूयिष्ठं मित्रभेदकरं खलम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७०॥

पाहिमामज्ञसङ्गण्यं दुराशाकुलकीलितम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७१॥

पाहिमां जननी भ्रातृ पितृशासन भञ्जनम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७२॥

पाहिमां दुर्वचोरम्यं स्वकीयोदर पोषकम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७३॥

पाहिमामयसम्पृक्तमाधिव्यूह समावृतम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७४॥

पाहिमां लसदाचारविहीनं कूटसाक्षिणम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७५॥

पाहिमां वसुधाभारभूतं दुर्वत्तिगामिनम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७६॥

पाहिमां कुमताचारप्रवर्तकमनारतम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७७॥

पाहिमां दुर्यशोयुक्तं चित्क्रियामार्गतामसम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७८॥

पाहिमां सद्भक्तिशून्यं करुणारसवर्जितम् ।

नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ७९॥

पाहिमामविनीताग्रेसरं पापानुरागिणम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८०॥

पाहिमां दीनभावाङ्कं शरणागतमन्वहम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८१॥

ममापराधसन्दोहं क्षमस्वार्चकवत्सल ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८२॥

अहम्भक्ति विहीनोपि पूजयामिष्टदो भव ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८३॥

त्वत्तः परं देशिकेन्द्रं नजाने मुक्तिदायकम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८४॥

ममस्वान्ते सदा स्थित्वा ज्ञानं देहि गुरूत्तम ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८५॥

त्वदीयपूतचारित्र्यं वर्णयामि सदा मुदा ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८६॥

जय सर्वजगन्नाथ करुणारससागर ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८७॥

जययोगीन्द्र साम्बापरावतार महेश्वर ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८८॥

भवदङ्घ्रिद्वयं दुर्भवाब्धिमग्न नृणां प्लवम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ८९॥

मन्त्रमूलं भवद्वाक्यं पूजामूलं पदं तव ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९०॥

मुक्तेस्तवदयाबीजं ध्यानहेतुस्तवाकृतिः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९१॥

प्रणामं कुर्वति मयि तव कोपः कथं भवेत् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९२॥

बालेनरचितेमन्तौ जनकस्तं त्यजेत्किमु ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९३॥

त्वमेव माता पिता दैवं बन्धुर्मित्रं सुखोत्सवम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९४॥

त्वां विना नहि लोकेस्मिन् भवरोगचिकित्सकः ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९५॥

अतस्त्वत्पदमाश्रित्य याचे सुज्ञानसम्पदम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९६॥

मत्वायं भृत्य इति मां त्राहि त्राहि कृपाकर ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९७॥

स्तोत्रं कर्तुं न शक्नोमि न मन्ये पूजनक्रममम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९८॥

यच्छेत्तुष्टिं यद्भवतस्तन्मया नविचारितम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ ९९॥

ज्ञानिभिस्सह पुत्रैश्च मां रक्ष जडधीषणम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १००॥

नभजेभवतस्त्वन्यं संस्थितेदातरित्वयि ।
नमस्ते सिद्धलिङ्गायं तोण्टदार्याय ते नमः ॥ १०१॥

जययोगीन्द्रतिलक पापपङ्कजकुञ्जर ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १०२॥

जयमुक्तिरमाकान्त जयनिश्चिन्तनिर्व्यय ।
नमस्ते सिद्धलिङ्गायं तोण्टदार्याय ते नमः ॥ १०३॥

नत्यजत्वं कृपासिन्धो रक्ष मां शरणागतम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १०४॥

मद्धृदज्ञानतिमिरं निवारय चिदर्क भो ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १०५॥

पापकूपनिमग्नाय मह्यं देहि कराश्रयम् ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १०६॥

त्वदङ्घ्रिदर्शनाज्जन्मसफलं देशिकेश्वर ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १०७॥

भगवत्पदाब्ज सद्भक्तिं प्रार्थयामि जगद्गुरो ।
नमस्ते सिद्धलिङ्गाय तोण्टदार्याय ते नमः ॥ १०८॥

एतत् स्तोत्रं पठेद्यस्तु सम्प्राप्नोति महत्सुखम् ।
वित्तार्थी लभते वित्तं ज्ञानार्थी लभते चिदम् ॥

मोक्षार्थी लभते मोक्षं पुत्रार्थी लभते सुतम् ।
समस्तेष्टार्थसिद्धिस्स्यात्सयं सत्यमिदं वचः ॥

श्रीमत् तोण्टदार्यस्य स्तोत्रस्याष्टोत्तरं शुभम् ।
कथितं भक्तिभावेन माकुटी वीर सूरिणा ॥

इति मागडि श्रीवीरप्पशास्त्रिविरचितं श्रीसिद्धलिङ्गेश्वरस्तोत्रं सम्पूर्णम् ।

Proofread by Vani V.

*Shri Siddhalingeshvara Stotram*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*